# Natya Shastra Chapter 17

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૧૭ કાકુસ્વરવ્યઞ્જનઃ

## Document Information

Text title : nATyashAstram.h adhyAya 17 kAkusvaravyanjanaH

File name : natya17.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : July 16, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાય ૧૭ કાકુસ્વરવ્યઞ્જનઃ

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ સપ્તદશોઽધ્યાયઃ ।

એવં તુ સંસ્કૃતં પાઠ્યં મયા પ્રોક્તં દ્વિજોત્તમાઃ ।
પ્રાકૃતસ્યાપિ પાઠ્યસ્ય સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૧॥

એતદેવ વિપર્યસ્તં સંસ્કારગુણવર્જિતમ્ ।
વિજ્ઞેયં પ્રાકૃતં પાઠ્યં નાનાવસ્થાન્તરાત્મકમ્ ॥ ૨॥

ત્રિવિધં તચ્ચ વિજ્ઞેયં નાટ્યયોગે સમાસતઃ ।
સમાનશબ્દં વિભ્રષ્ટં દેશીગતમથાપિ ચ ॥ ૩॥

કમલામલરેણુતરઙ્ગલોલસલિલાદિવાક્યસમ્પન્નમ્ ।
પ્રાકૃતબન્ધેષ્વેવં સંસ્કૃતમપિ યોગમુપયાતિ ॥ ૪॥

યે વર્ણાઃ સંયોગાત્ સ્વરવર્ણાન્યત્વં ન્યૂનતાં ચાપિ ।
ગચ્છન્તિ પદન્યસ્તાસ્તે વિભ્રષ્ટા ઇતિ જ્ઞેયાઃ ॥ ૫॥

યે વર્ણા વર્ણગતા વ્યઞ્જનયુક્તાશ્ચ યે સ્વરા નિયતાઃ ।
તાનપરસ્પરવૃત્તે પ્રાકૃતયુક્ત્યા પ્રવક્ષ્યામિ ॥ ૬॥

યથા -
એઓઆરપરાણિઅ અં આરપરં અ પાઅએ ણત્થિ ।
બસઆરમજ્ઝિમાઇ અ કચ વગ્ગતવાણિહણાઇમ્ ॥ ૭॥

વચ્ચન્તિ કગતદયવા લોપં અત્થં ચ સે વહંતિ સરા ।
ખધથધભા ઉણ હત્તં ઉર્વેતિ અત્થં અ મુંચંતા ॥ ૮॥

ઉપ્પરહુત્તરઆરો હેટાહુત્તો અ પાઅએ ણત્થિ ।
મોત્તૂણ ભદ્રચોદ્રહ પદ્રહ્રદચન્દ્રજાઈ સ ॥ ૯॥

ખઘથધભાણ હઆરો મુહમેહકહાવહૂપહ્ણએસુ ।
કગતદયવાણ ણિચ્ચં વીયમ્મિ ઠિઓ સરો હોઇ ॥ ૧૦॥

છ ઇતિ ષકારો નિત્યં બોદ્ધવ્યઃ ષટપદાદિયોગેષુ ।
કિલ શબ્દાન્ત્યો રેફો ભવતિ તથા ખુ ત્તિ ખલુશબ્દઃ ॥ ૧૧॥

ડ ઇતિ ચ ભવતિ ટકારો ભટકટકકુટીતટાદ્યેષુ ।
સત્વં ચ ભવતિ શષયોઃ સર્વત્ર તથા હિ સ સ આદેશઃ ॥ ૧૨॥

અષ્ટસ્પશ્ચ દકારો ભવત્યનાદૌ તકાર ઇતરાદ્યઃ ।
બડવાતડાગતુલ્યો ભવતિ ડકારોઽપિ ચ કકારઃ ॥ ૧૩॥

વર્ધનગતે ચ ભાવે ધકારવર્ણોઽપિ ઢત્વમુપયાતિ ।
સર્વત્ર ચ પ્રયોગે ભવતિ નકારોઽપિ ચ ણકારઃ ॥ ૧૪॥

આપાનમ્ આવાનં ભવતિ પકારેન વત્વયુક્તેન ।
અયથાતથાદિકેષુ તુ ભકારવર્ણો વ્રજીત હત્વમ્ ॥ ૧૫॥

પરુષં ફરુસં વિદ્યાત્પકારવર્ણોઽપિ ફત્વમુપયાતિ ।
યસ્તુ મૃતઃ સોઽપિ મઓ યશ્ચ મૃગઃ સોઽપિ હિ તથૈવ ॥ ૧૬॥

ઓકારત્વં ગચ્છેદૌકારશ્ચૌષધાદિષુ નિયુક્તઃ ।
પ્રચલાચિરાચલાદિષુ ભવતિ ચકારોઽપિ તુ યકારઃ ॥ ૧૭॥

અપરસ્પરનિષ્પન્ના હ્યેવં પ્રાકૃતસમાશ્રયા વર્ણાઃ ।
સંયુક્તાનાં તુ પુનર્વક્ષ્યે પરિવૃત્તિસંયોગમ્ ॥ ૧૮॥

શ્ચપ્સત્સધ્યાઃ છ ઇતિ તથાભ્યહ્યધ્યા
ભવન્તિ તુ ઝકારાઃ ।
ષ્ટઃ ટ્ઠઃ સ્તઃ સ્થઃ ષ્મૌ મ્હઃ
ક્ષ્ણો ણ્હઃ ષ્ણો ણ્હઃ ક્ષઃ ખકારરૂપોઽપિ ॥ ૧૯॥

આશ્ચર્યં અચ્છરિયં નિશ્ચયમિચ્છન્તિ ણિચ્છયં ચ યથા ।
વત્સં વચ્છં ચ યથા અપ્સરસં તદ્વદચ્છરઅમ્ ॥ ૨૦॥

ઉત્સાહો ઉચ્છાહો પથ્યં ચ પચ્છં વિજ્ઞેયમ્ ।
તુભ્યં તુજ્ઝં મહ્યં મજ્ઝં વિન્ધ્યશ્ચ ભવતિ વિંજ્ઝોત્તિ ॥ ૨૧॥

દષ્ટો વટ્ઠોત્તિ તહા હસ્તોઽપિ ચ ભવતિ હત્થોત્તિ ।
ગ્રીષ્મો ગિમ્હોત્તિ તથા શ્લક્ષ્ણં સણ્હં સદા તુ વિજ્ઞેયમ્ ॥ ૨૨॥

ઉષ્ણં ઉહ્ણ યક્ષો જક્ખો પર્યઙ્કો ભવતિ પલ્લંકુ ।
વિપરીતં હમયોગે બ્રહ્માદૌ સ્યાદ્ બૃહસ્પતૌ ફ્ત્વમ્ ॥ ૨૩॥

યજ્ઞો ભવતિ ન જન્નો ભીષ્મો ભિમ્હોત્તિ વિજ્ઞેયઃ ।
ઉપરિગતોઽધસ્તાદ્વા ભવેત્કકારાદિકસ્તુ યો વર્ણઃ ॥ ૨૪॥

સ હિ સંયોગવિહીનઃ શુદ્ધઃ કાર્યઃ પ્રયોગેઽસ્મિન્ ।
એવમેતત્તુ વિજ્ઞેયં પ્રાકૃતં સંસ્કૃતં તથા ॥ ૨૫॥

અત ઊર્ધ્વં પ્રવક્ષ્યામિ દેશભાષાવિકલ્પનમ્ ।
ભાષા ચતુર્વિધા જ્ઞેયા દશરૂપે પ્રયોગતઃ ॥ ૨૬॥

સંસ્કૃતં પ્રાકૃતં ચૈવ યત્ર પાઠ્યં પ્રયુજ્યતે ।
અતિભાષાર્યભાષા ચ જાતિભાષા તથૈવ ચ ॥ ૨૭॥

તથા યોન્યન્તરી ચૈવ ભાષા નાટ્યે પ્રકીર્તિતા ।
અતિભાષા તુ દેવાનામાર્યભાષા તુ ભૂભુજામ્ ॥ ૨૮॥

સંસ્કારપાઠ્યસંયુક્તા સમ્યઙ્ ન્યાય્યપ્રતિષ્ઠિતા ।
વિવિધા જાતિભાષા ચ પ્રયોગે સમુદાહૃતા ॥ ૨૯॥

મ્લેચ્છશબ્દોપચારા ચ ભારતં વર્ષમાશ્રિતા ।
અથ યોન્યન્તરી ભાષા ગ્રામ્યારણ્યપશૂદ્ભવા ॥ ૩૦॥

નાનાવિહઙ્ગજા ચૈવ નાટ્યધર્મી પ્રતિષ્ઠિતા ॥ ૩૧॥

જાતિભાષાશ્રયં પાઠ્યં દ્વિવિધં સમુદાહૃતમ્ ।
પ્રાકૃતં સંસ્કૃતં ચૈવ ચાતુર્વર્ણ્યસમાશ્રયમ્ ।
ધીરોદ્ધતે સલલિતે ધીરોદાત્તે તથૈવ ચ ॥ ૩૨॥

ધીરપ્રશાન્તે ચ તથા પાઠ્યં યોજ્યં તુ સંસ્કૃતમ્ ।
એષામેવ તુ સર્વેષાં નાયકાનાં પ્રયોગતઃ ॥ ૩૩॥

કારણવ્યપદેશેન પ્રાકૃતં સમ્પ્રયોજયેત્ ।
દારિદ્ર્યાધ્યયનાભાવયદૃચ્છાદિભિરેવ ચ ॥ ૩૪॥

ઐશ્વર્યેણ પ્રમત્તાનાં દારિદ્ર્યેણ પ્લુતાત્મનામ્ ।
અનધીતોત્તમાનાં ચ સંસ્કૃતં ન પ્રયોજયેત્ ॥ ૩૫॥

વ્યાજલિઙ્ગપ્રવિષ્ટાનાં શ્રમણાનાં તપસ્વિનામ્ ।
ભિક્ષુચક્રચરાણાં ચ પ્રાકૃતં સમ્પ્રયોજયેત્ ॥ ૩૬॥

ભાગવતતાપસોન્મત્તબાલનીચગ્રહોપસૃષ્ટેષુ ।
સ્ત્રીનીચજાતિષુ તથા નપુંસકે પ્રાકૃતં યોજ્યમ્ ॥ ૩૭॥

પરિવ્રાણ્મુનિશાક્યેષુ ચોક્ષેષુ શ્રોત્રિયેષુ ચ ।
શિષ્ટા યે ચૈવ લિઙ્ગસ્થાઃ સંસ્કૃતં તેષુ યોજયેત્ ॥ ૩૮॥

રાજ્ઞાશ્ચ ગણિકાયાશ્ચ શિલ્પકાર્યાસ્તથૈવ ચ ।
કલાવસ્થાન્તરકૃતં યોજ્યં પાઠ્યં તુ સંસ્કૃતમ્ ॥ ૩૯॥

સન્ધિવિગ્રહસમ્બન્ધં તથા ચ પ્રાપ્તવાગ્ગતિમ્ ।
ગ્રહનક્ષત્રચરિતં ખગાનાં રુતમેવ ચ ॥ ૪૦॥

સર્વમેતત્તુ વિજ્ઞેયં કાવ્યબન્ધે શુભાશુભમ્ ॥ ૪૧॥

ક્રીડાર્થં સર્વલોકસ્ય પ્રયોગે ચ સુખાશ્રયમ્ ।
કલાભ્યાસાશ્રયં ચૈવ પાઠ્યં વેશ્યાસુ સંસ્કૃતમ્ ॥ ૪૨॥

કલોપચારજ્ઞાનાર્થં ક્રીડાર્થં પાર્થિવસ્ય ચ ।
નિર્દિષ્ટં શિલ્પકાર્યાસ્તુ નાટકે સંસ્કૃતં વચઃ ॥ ૪૩॥

આમ્નાયસિદ્ધં સર્વાસાં શુભમપ્સરસાં વચઃ ।
સંસર્ગાદ્દેવતાનાં ચ તદ્ધિ લોકોઽનુવર્તતે ॥ ૪૪॥

છન્દતઃ પ્રાકૃતં પાઠ્યં સ્મૃતમપ્સરસાં ભુવિ ।
માનુષાણાં ચ કર્તવ્યં કારણાર્થવ્યપેક્ષયા ॥ ૪૫॥

સર્વાસ્વેહ હિ શુદ્ધાસુ જાતિષુ દ્વિજસત્તમાઃ ।
શૌરસેનીં સમાશ્રિત્ય ભાષાં કાવ્યેષુ યોજયેત્ ॥ ૪૬॥

અથવા છન્દતઃ કાર્યા દેશભાષા પ્રયોક્તૃભિઃ ।
નાનાદેશસમુત્થં હિ કાવ્યં ભવતિ નાટકે ॥ ૪૭॥

માગધ્યવન્તિજા પ્રાચ્યા શૌરસેન્યર્ધમાગધી ।
બાહ્લીકા દક્ષિણાત્યા ચ સપ્ત ભાષાઃ પ્રકીર્તિતાઃ ॥ ૪૮॥

શકારાભીરચણ્ડાલશવરદ્રમિલોદ્રજાઃ ।
હીના વનેચરાણાં ચ વિભાષા નાટકે સ્મૃતા ॥ ૪૯॥

માગધી તુ નરેન્દ્રાણામન્તઃપુરસમાશ્રયા ।
ચેટાનાં રાજપુત્રાણાં શ્રેષ્ઠિનાં ચાર્ધમાગધી ॥ ૫૦॥

પ્રાચ્યા વિદૂષકાદીનાં ધૂર્તાનામપ્યવન્તિજા ।
નાયિકાનાં સખીનાં ચ શૂરસેન્યવિરોધિની ॥ ૫૧॥

યૌધનાગરકાદીનાં દક્ષિણાત્યાથ દીવ્યતામ્ ।
બાહ્લીકભાષોદીચ્યાનાં ખસાનાં ચ સ્વદેશજા ॥ ૫૨॥

શકારઘોષકાદીનાં તત્સ્વભાવશ્ચ યો ગણઃ ।
શકારભાષા યોક્તવ્યા ચાણ્ડાલી પુલ્કસાદિષુ ॥ ૫૩॥

અઙ્ગારકારકવ્યાધકાષ્ઠયન્ત્રોપજીવિનામ્ ।
યોજ્યા શકારભાષા તુ કિંચિદ્વાનૌકસી તથા ॥ ૫૪॥

ગજાશ્વાજાવિકોષ્ટ્રાદિઘોષસ્થાનનિવાસિનામ્ ।
આભીરોક્તિઃ શાવરી વા દ્રામિડી વનચારિષુ ॥ ૫૫॥

સુરઙ્ગાખનકાદીનાં સન્ધિકારાશ્વરક્ષતામ્ ।
વ્યસને નાયકાનાં ચાપ્યાત્મરક્ષાસુ માગધી ॥ ૫૬॥

ન બર્બરકિરાતાન્ધ્રદ્રમિલાદ્યાસુ જાતિષુ ।
નાટ્યપ્રયોગે કર્તવ્યં કાવ્યં ભાષાસમાશ્રિતમ્ ॥ ૫૭॥

ગઙ્ગાસાગરમધ્યે તુ યે દેશાઃ સમ્પ્રકીર્તિતાઃ ।
એકારબહુલાં તેષુ ભાષાં તજ્જ્ઞઃ પ્રયોજયેત્ ॥ ૫૮॥

વિન્ધ્યસાગરમધ્યે તુ યે દેશાઃ શ્રુતિમાગતાઃ ।
નકારબહુલાં તેષુ ભાષાં તજ્જ્ઞઃ પ્રયોજયેત્ ॥ ૫૯॥

સુરાષ્ટ્રાવન્તિદેષેષુ વેત્રવત્યુત્તરેષુ ચ ।
યે દેશાસ્તેષુ કુર્વીત ચકારપ્રાયસંશ્રયામ્ ॥ ૬૦॥

હિમવત્સિન્ધુસૌવીરાન્યે જનાઃ સમુપાશ્રિતાઃ ।
ઉકારબહુલાં તજ્જ્ઞસ્તેષુ ભાષાં પ્રયોજયેત્ ॥ ૬૧॥

ચર્મણ્વતીનદીતીરે યે ચાર્બુદસમાશ્રિતાઃ ।
તકારબહુલાં નિત્યં તેષુ ભાષાં પ્રયોજયેત્ ॥ ૬૨॥

એવં ભાષાવિધાનં તુ કર્તવ્યં નાટકાશ્રયમ્ ।
અત્ર નોક્તં મયા યત્તુ લોકાદ્ ગ્રાહ્યં બુધૈસ્તુ તત્ ॥ ૬૩॥

એવં ભાષાવિધાનં તુ મયા પ્રોક્તં દ્વિજોત્તમાઃ ।

પુનર્વાક્યવિધાનં તુ લૌકિકં સન્નિબોધત ॥ ૬૪॥

ઉત્તમૈર્મધ્યમૈર્નીચૈર્યે સંભાષ્યા યથા નરાઃ ।
સમાનોત્કૃષ્ટહીનાશ્ચ નાટકે તાન્નિબોધત ॥ ૬૫॥

દેવાનામપિ યે દેવા મહાત્માનો મહર્ષયઃ ।
ભગવન્નિતિ તે વાચ્યા યાસ્તેષાં યોષિતસ્તથા ॥ ૬૬॥

દેવાશ્ચ લિઙ્ગિનશ્ચૈવ નાનાશ્રુતધરાશ્ચ યે ।
ભગવન્નિતિ યે વાચ્યાઃ પુરુષૈઃ સ્ત્રીભિરેવ ચ ॥ ૬૭॥

આર્યેતિ બ્રાહ્મણં બ્રૂયાન્મહારાજેતિ પાર્થિવમ્ ।
ઉપાધ્યાયેતિ ચાચાર્યં વૃદ્ધં તાતેતિ ચૈવ હિ ॥ ૬૮॥

નામ્ના રાજેતિ વા વાચ્યા બ્રાહ્મણૈસ્તુ નરાધિપાઃ ।
તત્ક્ષામ્યં હિ મહીપાલૈર્યસ્માત્પૂજ્યા દ્વિજાઃ સ્મૃતાઃ ॥ ૬૯॥

બ્રાહ્મણૈઃ સચિવો વાચ્યો હ્યમાત્યઃ સચિવેતિ વા ।
શેષૈરન્યૈર્જનૈર્વાચ્યો હીનૈરાર્યેતિ નિત્યશઃ ॥ ૭૦॥

સમૈઃ સમ્ભાષણં કાર્યં યેન નામ્ના સ સંજ્ઞિતઃ ।
હીનૈઃ સપરિવારં તુ નામ્ના સમ્ભાષ્ય ઉત્તમઃ ॥ ૭૧॥

નિયોગાધિકૃતાશ્ચૈવ પુરુષા યોષિતસ્તથા ।
કારુકાઃ શિલ્પિનશ્ચૈવ સમ્ભાષ્યાસ્તે તથૈવ હિ ॥ ૭૨॥

માર્ષો ભાવેતિ વક્તવ્યઃ કિઞ્ચિદૂનસ્તુ માર્ષકઃ ।
સમાનોઽથ વયસ્યેતિ હં હ્રો હણ્ડેતિ વાધમઃ ॥ ૭૩॥

આયુષ્મન્નિતિ વાચ્યસ્તુ રથી સૂતેન સર્વદા ।
તપસ્વીતિ પ્રશાન્તસ્તુ સાધો ઇતિ ચ શબ્દ્યતે ॥ ૭૪॥

સ્વામીતિ યુવરાજસ્તુ કુમારો ભર્તૃદારકઃ ।
સૌમ્ય ભદ્રમુખેત્યેવં હે પૂર્વં ચાધમં વદેત્ ॥ ૭૫॥

યદ્યસ્ય કર્મ શિલ્પં વા વિદ્યા વા જાતિરેવ વા ।
સ તેન નામ્ના ભાષ્યો હિ નાટકાદૌ પ્રયોક્તૃભિઃ ॥ ૭૬॥

વત્સ પુત્રક તાતેતિ નામ્ના ગોત્રેણ વા પુનઃ ।
વાચ્યઃ શિષ્યઃ સુતો વાપિ પિત્રા વા ગુરુણાપિ વા ॥ ૭૭॥

સમ્ભાષ્યા શાક્યનિર્ગ્રન્થા ભદન્તેતિ પ્રયોક્તૃભિઃ ।
આમન્ત્રણૈસ્તુ પાષણ્ડાઃ શેષાઃ સ્વસમયાશ્રિતૈઃ ॥ ૭૮॥

દેવેતિ નૃપતિર્વાચ્યો ભૃત્યૈઃ પ્રકૃતિભિસ્તથા ।
ભટ્ટેતિ સાર્વભૌમસ્તુ નિત્યં પરિજનેન હિ ॥ ૭૯॥

રાજન્નિત્યૃષિભિર્વાચ્યો હ્યપત્યપ્રત્યયેન વા ।
વયસ્ય રાજન્નિતિ વા ભવેદ્વાચ્યો મહીપતિઃ ॥ ૮૦॥

વિદૂષકેણ રાજ્ઞી ચ ચેટી ચ ભવતીત્યપિ ।
નામ્ના વયસ્યેત્યપિ વા રાજ્ઞા વાચ્યો વિદૂષકઃ ॥ ૮૧॥

સર્વસ્ત્રીભિઃ પતિર્વાચ્ય આર્યપુત્રેતિ યૌવને ।
અન્યદા પુનરાર્યેતિ મહારાજેતિ ભૂપતિઃ ॥ ૮૨॥

આર્યેતિ પૂર્વજો ભ્રાતા વાચ્યઃ પુત્ર ઇવાનુજઃ ।
યોષિદ્ભિરથ કામ્યેતિ રાજપુત્રેતિ યોધનૈઃ ॥ ૮૩॥

પુરુષાભાષણં હ્યેવ કાર્યં નાટ્યે પ્રયોક્તૃભિઃ ।
પુનઃ સ્ત્રીણાં પ્રવક્ષ્યામિ યથાભાષ્યાસ્તુ નાટકે ॥ ૮૪॥

તપસ્વિન્યો દેવતાશ્ચ વાચ્યા ભગવતીતિ ચ ।
ગુરુભાર્યા તુ વક્તવ્યા સ્થાનીયા ભવતીતિ ચ ॥ ૮૫॥

ગમ્યા ભદ્રેતિ વાચ્યા વૈ વૃદ્ધામ્બેતિ ચ નાટકે ।
રાજપત્ન્યસ્તુ સમ્ભાષ્યાઃ સર્વાઃ પરિજનેન વૈ ॥ ૮૬॥

ભટ્ટિની સ્વામિની દેવીત્યેવં વૈ નાટકે બુધૈઃ ।
દેવીતિ મહિષી વાચ્યા રાજ્ઞા પરિજનેન વા ॥ ૮૭॥

ભોગિન્યઃ પરિશિષ્ટાસ્તુ સ્વામિન્ય ઇતિ વા પુનઃ ।
કુમાર્યશ્ચૈવ વક્તવ્યાઃ પ્રેષ્યાભિર્ભર્તૃદારિકાઃ ॥ ૮૮॥

સ્વસેતિ ભગિની વાચ્યા વત્સેતિ ચ યવીયસી ।
બ્રાહ્મણ્યાર્યેતિ વક્તવ્યા લિઙ્ગસ્થા વ્રતિની ચ યા ॥ ૮૯॥

પત્ની ચાર્યેતિ સમ્ભાષ્યા પિતૃનામ્ના સુતસ્ય સા ।
સમાનાભિસ્તથા સખ્યો હલેતિ સ્યાત્પરસ્પરમ્ ॥ ૯૦॥

પ્રેષ્યા હજ્જેતિ વક્તવ્યા સ્ત્રિયો યા તૂત્તમા ભવેત્ ।
અજ્જુકેતિ ચ વક્તવ્યા વેશ્યા પરિજનેન ચ ॥ ૯૧॥

અત્તેતિ ગણિકા માતા વાચ્યા પરિજનેન હિ ।
પ્રિયેતિ ભાર્યા શૃઙ્ગારે વાચ્યા રાજ્ઞેતરેણ વા ॥ ૯૨॥

પુરોધઃ સાર્થવાહાનાં ભાર્યાસ્ત્વાર્યેતિ સર્વદા ।
તલ્લિઙ્ગાર્થાનિ નામાનિ કાર્યાણિ કવિભિઃ સદા ॥ ૯૩॥

ઔત્પત્તિકાનિ યાનિ સ્યુર્ન પ્રખ્યાતાનિ નાટકે ।
બ્રહ્મક્ષત્રસ્ય નામાનિ ગોત્રકર્માનુરૂપતઃ ॥ ૯૪॥

કાવ્યે કાર્યાણિ કવિભિઃ શર્મવર્મકૃતાનિ હિ ।
દત્તપ્રાયાણિ નામાનિ વણિજાં સમ્પ્રયોજયેત્ ॥ ૯૫॥

કાપાલિકાસ્તુ ઘણ્ટાન્તનામાનઃ સમુદાહૃતા ।
શૌર્યોદાત્તાનિ નામાનિ તથા શૂરેષુ યોજયેત્ ॥ ૯૬॥

વિજયાર્થાનિ નામાનિ રાજસ્ત્રીણાં તુ નિત્યશઃ ।
દત્તા મિત્રા સેનેતિ વેશ્યાનામાનિ યોજયેત્ ॥ ૯૭॥

નાનાકુસુમનામાનઃ પ્રેષ્યાઃ કાર્યાસ્તુ નાટકે ।
મઙ્ગલાર્થાનિ નામાનિ ચેટાનામપિ યોજયેત્ ॥ ૯૮॥

ગમ્ભીરાર્થાનિ નામાનિ હ્યુત્તમાનાં પ્રયોજયેત્ ।
યસ્માન્નામાનુસદૃશં કર્મ તેષાં ભવિષ્યતિ ॥ ૯૯॥

જાતિચેષ્ટાનુરૂપાણિ શેષાણામપિ કારયેત્ ।
નામાનિ પુરુષાણાં તુ સ્ત્રીણાં ચોક્તાનિ તત્ત્વતઃ ॥ ૧૦૦॥

એવં નામવિધાનં તુ કર્તવ્યં કવિભિઃ સદા ।
એવં ભાષાવિધાનં તુ જ્ઞાત્વા કર્માણ્યશેષતઃ ॥ ૧૦૧॥

પાઠ્યગુણાનિદાનીં વક્ષ્યામઃ । તદ્યથા સપ્તસ્વરાઃ, ત્રીણિ
સ્થાનાનિ, ચત્વારો વર્ણાઃ, દ્વિવિધા કાકુઃ, ષડલઙ્કારાઃ,
ષડઙ્ગાનીતિ । એષામિદાનીં લક્ષણમભિવ્યાખ્યાસ્યામઃ ।
તત્ર સપ્તસ્વરા નામ -
ષડ્જર્ષભગાન્ધારમધ્યમપઞ્ચમધૈવતનિષાદાઃ ત એતે
રસેષૂપપાદ્યાઃ ॥ ૧૦૨॥

યથા -

તતઃ પાઠ્યં પ્રયુઞ્જીત ષડલઙ્કારસંયુતમ્ ।
હાસ્યશૃઙ્ગારયોઃ કાર્યૌ સ્વરૌ મધ્યમપઞ્ચમૌ ॥ ૧૦૩॥

ષડ્જર્ષભૌ તથા ચૈવ વીરરૌદ્રાદ્ભુતેષ્વથ ।
ગાન્ધારશ્ચ નિષાદશ્ચ કર્તવ્યૌ કરુણે રસે ॥ ૧૦૪॥

ધૈવતશ્ચૈવ કર્તવ્યો બીભત્સે સભયાનકે ।
ત્રીણિ સ્થાનાનિ - ઉરઃ કણ્ઠઃ શિર ઇતિ । ભવત્યપિ ચ
શારીર્યામથ વીણાયાં ત્રિભ્યઃ સ્થાનિભ્ય એવ તુ ।
ઉરસઃ શિરસઃ કણ્ઠાત્સ્વરઃ કાકુઃ પ્રવર્તતે ॥ ૧૦૫॥

આભાષણં ચ દૂરસ્થે શિરસા સમ્પ્રયોજયેત્ ।
નાતિદૂરે ચ કણ્ઠેન હ્યુરસા ચૈવ પાર્શ્વતઃ ॥ ૧૦૬॥

ઉરસોદાહૃતં વાક્યં શિરસા દીપયેદ્ બુધઃ ।
કણ્ઠેન શમનં કુર્યાત્પાઠ્યયોગેષુ સર્વદા ॥ ૧૦૭॥

ઉદાત્તશ્ચાનુદાત્તશ્ચ સ્વરિતઃ કમ્પિતસ્તથા ।
વર્ણાશ્ચત્વાર એવ સ્યુઃ પાઠ્યયોગે તપોધનાઃ ॥ ૧૦૮॥

તત્ર હાસ્યશૃઙ્ગારયોઃ સ્વરિતોદાત્તૈર્વર્ણૈઃ પાઠ્યમુપપાદ્યં,
વીરરૌદ્રાદ્ભુતેષૂદાત્તકમ્પિતૈઃ
કરુણબીભત્સભયાનકેષ્વનુદાત્તસ્વરિતકમ્પિતૈરિતિ । દ્વિવિધા
કાકુઃ સાકાંક્ષા નિરાકાંક્ષા ચેતિ વાક્યસ્ય
સાકાંક્ષનિરાકાંક્ષકત્વાત્ ॥ ૧૦૯॥

અનિયુક્તાર્થકં વાક્યં સાકાંક્ષમિતિ સંજ્ઞિતમ્ ।
નિયુક્તાર્થં તુ યદ્વાક્યં નિરાકાંક્ષં તદુચ્યતે ॥ ૧૧૦॥

તત્ર સાકાંક્ષં નામ
તારાદિમન્દ્રાન્તમનિયુક્તાર્થમનિર્યાતિતવર્ણાલઙ્કારં
કણ્ઠોરઃસ્થાનગતમ્ । નિરાકાંક્ષં નામ નિયુક્તાર્થં
નિર્યાતિતવર્ણાલઙ્કારં શિરઃસ્થાનગતં માન્દ્રાદિતારાન્તમિતિ ।
અથ ષડલઙ્કારા નામ -
ઉચ્ચો દીપ્તશ્ચ મન્દ્રશ્ચ નીચો દ્રુતવિલમ્બિતૌ ।
પાઠ્યસ્યૈતે હ્યલઙ્કારા લક્ષણં ચ નિબોધત ॥ ૧૧૨॥

ઉચ્ચો નામ  શિરઃસ્થાનગતસ્તારસ્વરઃ, સ ચ

દૂરસ્થાભાષણવિસ્મયોત્તરોત્તરસંજલ્પદૂરાહ્વાનત્રાસનાબાધાદિષુ ।
દીપ્તો નામ શિરઃસ્થાનગતસ્તારતરઃ, સ
ચાક્ષેપકલહવિવાદામર્ષકૃષ્ટાધર્ષણક્રોધશૌર્યદર્પતી-
ક્ષ્ણરૂક્ષાભિધાનનિર્ભર્ત્સનાક્રન્દિતાદિષુ ।
મન્દ્રો નામ ઉરઃસ્થાનગતો નિર્વેદગ્લાનિચિન્તૌત્સુક્યદૈન્યવ્યાધિક્રીડા-
ગાઢશસ્ત્રક્ષતમૂર્છામદગુહ્યાર્થવચનાદિષુ ।
નીચો નામ ઉરઃસ્થાનગતો મન્દ્રતરઃ, સ ચ
સ્વભાવાભાષણવ્યાધિશમશ્રમાર્તત્રસ્તપતિતમૂર્છિતાદિષુ ।
દ્રુતો નામ કણ્ઠગતઃ સ ચ ત્વરિતઃ,
લલ્લનમન્મનભયશીતજ્વરત્રાસાત્યસ્તાત્યયિકકાર્યાવેદનાદિષુ ।
વિલમ્બિતો નામ કણ્ઠસ્થાનગતસ્તનુમન્દ્રઃ, સ ચ
શ ૃઙ્ગારકરુણવિતર્કિતવિચારામર્ષાસૂયિતાવ્યક્તાર્થપ્રવાદલજ્જા-
ચિન્તાતર્જનવિસ્મયદોષાનુકીર્તનદીર્ઘરોગનિપીડનાદિષુ
અત્રાનુવંશ્યા શ્લોકા ભવન્તિ ॥ ૧૧૩-૧૧૪॥

ઉત્તરોત્તરસંજલ્પપરુષાક્ષેપણેષુ ચ ।
તીક્ષ્ણરૂક્ષાભિનયને આવેગે ક્રન્દિતે તથા ॥ ૧૧૫॥

પરોક્ષસ્ય સમાહ્વાને તર્જને ત્રાસને તથા ।
દૂરસ્થાભાષણે ચૈવ તથા નિર્ભર્ત્સનેષુ ચ ॥ ૧૧૬॥

ભાવેષ્વેતેષુ નિત્યં હિ નાનારસસમાશ્રયા ।
ઉચ્ચા દીપ્તા દ્રુતા ચૈવ કાકુઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૧૧૭॥

વ્યાધિતે ચ જ્વરાર્તે ચ ભયાર્તે શીતવિપ્લુતે ।
નિયમસ્થે વિતર્કે ચ ગાઢશસ્ત્રક્ષતેષુ ચ ॥ ૧૧૮॥

ગુહ્યાર્થવચને ચૈવ ચિન્તાયાં તપસિ સ્થિતે ।
મન્દ્રા નીચા ચ કર્તવ્યા કાકુર્નાટ્યપ્રયોક્તૃભિઃ ॥ ૧૧૯॥

લલ્લે ચ મન્મને ચૈવ ભયાર્તે શીતવિપ્લુતે ।
મન્દ્રા દ્રુતા ચ કર્તવ્યા કાકુર્નાટ્યપ્રયોક્તૃભિઃ ॥ ૧૨૦॥

દૃષ્ટનષ્ટાનુસરણે ઇષ્ટાનિષ્ટશ્રુતે તથા ।
ઇષ્ટાર્થખ્યાપને ચૈવ ચિન્તાધ્યાને તથૈવ ચ ॥ ૧૨૧॥

ઉન્માદેઽસૂયિતે ચૈવ ઉપાલમ્ભે તથૈવ હિ ।

અવ્યક્તાર્થપ્રવાદે ચ કથાયોગે તથૈવ ચ ॥ ૧૨૨॥

ઉત્તરોત્તરસંજલ્પે કાર્યેઽતિશયસંયુતે ।
વિકૃતે વ્યાધિતે ક્રોધે દુઃખે શોકે તથૈવ ચ ॥ ૧૨૩॥

વિસ્મયામર્ષયોશ્ચૈવ પ્રહર્ષે પરિદેવિતે ।
વિલમ્બિતા ચ દીપ્તા ચ કાકુર્મન્દ્રા ચ વૈ ભવેત્ ॥ ૧૨૪॥

લઘ્વક્ષરપ્રાયકૃતે ગુર્વક્ષરકૃતે તથા ।
ઉચ્ચા દીપ્તા ચ કર્તવ્યા કાકુસ્તત્ર પ્રયોક્તૃભિઃ ॥ ૧૨૫॥

યાનિ સૌમ્યાર્થયુક્તાનિ સુખભાવકૃતાનિ ચ ।
મન્દ્રા વિલમ્બિતા ચૈવ તત્ર કાકુર્વિધીયતે ॥ ૧૨૬॥

યાનિ સ્યુસ્તીક્ષ્ણરૂક્ષાણિ દીપ્તા ચોચ્ચા ચ તેષ્વપિ ।
એવં નાનાશ્રયોપેતં પાઠ્યં યોજ્યં પ્રયોક્તૃભિઃ ॥ ૧૨૭॥

હાસ્યશૃઙ્ગારકરુણેષ્વિષ્ટા કાકુર્વિલમ્બિતા ।
વીરરૌદ્રાદ્ભુતેષૂચ્ચા દીપ્તા વાપિ પ્રશસ્યતે ॥ ૧૨૮॥

ભયાનકે સબીભત્સે દ્રુતા નીચા ચ કીર્તિતા ।
એવં ભાવરસોપેતા કાકુઃ કાર્યા પ્રયોક્તૃભિઃ ॥ ૧૨૯॥

અથાઙ્ગાનિ ષટ્ - વિચ્છેદોઽર્પણ વિસર્ગોઽનુબન્ધો દીપનં પ્રશમનમિતિ । તત્ર વિચ્છેદો નામ વિરામકૃતઃ । અર્પણં નામ લીલાયમાનમધુરવલ્ગુના સ્વરેણ પૂરયતેવ રઙ્ગં યત્પઠ્યતે તદર્પણમ્ । વિસર્ગો નામ વાક્યન્યાસઃ । અનુબન્ધો નામ પદાન્તરેષ્વપિ વિચ્છેદઃ, અનુચ્છ્વસનં વા । દીપનં નામ ત્રિસ્થાનશોભિ વર્ધમાનસ્વરં ચેતિ । પ્રશમનં નામ તારગતાનાં સ્વરાણાં પ્રશામ્યતામવૈસ્વર્યેણાવતારણમિતિ । એષાં ચ રસગતઃ પ્રયોગઃ - તત્ર હાસ્યશૃઙ્ગારયોરાકાંક્ષાયામર્પણવિચ્છેદદીપનપ્રશમનયુક્તં પાઠ્યં કાર્યમ્ । દીપનપ્રશમનયુક્તં કરુણે । વિચ્છેદપ્રશમનદીપનાનુબન્ધબહુલં વીરરૌદ્રાદ્ભુતેષુ વિસર્ગવિચ્છેદયુક્તં બીભત્સભયાનકયોરિતિ । સર્વેષામપ્યેષાં મન્દ્રમધ્યતારકૃતઃ પ્રયોગસ્ત્રિસ્થાનગતઃ । તત્ર દૂરસ્થાભાષણે તારં શિરસા, નાતિદૂરે મધ્યં કણ્ઠેન,

પાર્શ્વતો મન્દ્રમુરસા પ્રયોજયેત્પાઠ્યમિતિ । મન્દ્રાત્તારં ન
ગચ્છેત્, તારાદ્વા મન્દ્રમિતિ ॥ ૧૩૦॥

એષાં ચ દ્રુતમધ્યવિલમ્બિતાસ્ત્રયો લયા રસેષૂપપાદ્યાઃ । તત્ર
હાસ્યશૃઙ્ગારયોર્મધ્યલયઃ, કરુણે વિલમ્બિતો,
વીરરૌદ્રાદ્ભુતબીભત્સભયાનકેષુ દ્રુત ઇતિ ।
અથ વિરામઃ અર્ધસમાપ્તો કાર્યવશાન્ન છન્દોવશાત્ । કસ્માત્,
દૃશ્યન્તે હ્યેકદ્વિત્રિચતુરક્ષરા વિરામાઃ । યથા -
કિં ! ગચ્છ, મા વિશ સુદુર્જન ! વારિતોઽઽસિ
કાર્યં ત્વયા ન મમ સર્વજનોપયુક્તમ્ ।
સૂચાસુ ચાઙ્કુરગતે ચ તથોપચારે -
ષ્વલ્પાક્ષરાણિ હિ પદાનિ ભવન્તિ કાવ્યે ॥ ૧૩૨॥

એવં વિરામે પ્રયત્નોઽનુષ્ઠેયઃ । કસ્માત્, વિરામો હ્યર્થાનુદર્શકઃ
સઃ ।
અત્ર શ્લોકૌ -
વિરામેષુ પ્રયત્નો હિ નિત્યં કાર્યઃ પ્રયોક્તૃભિઃ ।
કસ્માદભિનયો હ્યસ્મિન્નર્થાપેક્ષી યતઃ સ્મૃતઃ ॥ ૧૩૩॥

યત્ર વ્યગ્રાવુભૌ હસ્તૌ તત્ર દૃષ્ટિસમન્વિતઃ ।
વાચિકાભિનયઃ કાર્યો વિરામૈરર્થદર્શકૈઃ ॥ ૧૩૪॥

પ્રાયો વીરે ચ રૌદ્રે ચ કરૌ પ્રહરણાકુલૌ ।
બીભત્સે કુત્સિતત્વાચ્ચ ભવતઃ કુઞ્ચિતૌ કરૌ ॥ ૧૩૫॥

હાસ્યે ચોદ્દેશમાત્રેણ કરુણે ચ પ્રલમ્બિતૌ ।
અદ્ભુતે વિસ્મયાત્સ્તબ્ધૌ ભયાચ્ચૈવ ભયાનકે ॥ ૧૩૬॥

એવમાદિષુ ચાન્યેષુ પ્રવિચારેઽપિ હસ્તયોઃ ।
અલઙ્કારવિરામાભ્યાં સાધ્યતે હ્યર્થનિશ્ચયઃ ॥ ૧૩૭॥

યે વિરામાઃ સ્મૃતા વૃત્તે તેષ્વલઙ્કાર ઇષ્યતે ।
સમાપ્તેઽર્થે પદે વાપિ તથા પ્રાણવશેન વા ॥ ૧૩૮॥

પદવર્ણસમાસે ચ દ્રુતે બહ્વર્થસઙ્કટે ।
કાર્યો વિરામઃ પાદાન્તે તથા પ્રાણવશેન વા ॥ ૧૩૯॥

શેષમર્થવશેનૈવ વિરામં સમ્પ્રયોજયેત્ ।

અત્ર ચ ભાવગતાનિ ચ કૃષ્યાક્ષરાણિ બોદ્ધવ્યાનિ, તદ્યથા -

આકારૈકારસંયુક્તમૈકારૌકારસંયુતમ્ ।
વ્યઞ્જનં યદ્ભવેદ્દીર્ઘં કૃષ્યં તત્તુ વિધીયતે ॥ ૧૪૦॥

વિષાદે ચ વિતર્કે ચ પ્રશ્નેઽથામર્ષ એવ ચ ।
કલાકાલપ્રમાણેન પાઠ્યં કાર્યં પ્રયોક્તૃભિઃ ॥ ૧૪૧॥

શેષાણામર્થયોગેન વિરામે વિરમેદિહ ।
એકદ્વિત્રિચતુઃપઞ્ચષટ્કલં ચ વિલમ્બિતમ્ ॥ ૧૪૨॥

વિલમ્બિતે વિરામે હિ સદા ગુર્વક્ષરં ભવેત્ ।
ષણ્ણાં કલાનાં પરતો વિલમ્બો ચ વિધીયતે ॥ ૧૪૩॥

અથવા કારણોપેતં પ્રયોગં કાર્યમેવ ચ ।
સમીક્ષ્ય વૃત્તે કર્તવ્યો વિરામો રસભાવતઃ ॥ ૧૪૪॥

યે વિરામાઃ સ્મૃતાઃ પાઠ્યે વૃત્તપાદસમુદ્ભવાઃ ।
ઉત્ક્રમ્યાપિ ક્રમં તજ્જ્ઞૈઃ કાર્યાસ્તેઽર્થવશાનુગાઃ ॥ ૧૪૫॥

નાપશબ્દં પઠેત્તજ્જ્ઞો ભિન્નવૃત્તં તથૈવ હિ ।
વિશ્રમેન્નાવિરામેષુ દૈન્યે કાકું ન દીપયેત્ ॥ ૧૪૬॥

વર્જિતં કાવ્યદોષૈસ્તુ લક્ષણાઢ્યં ગુણાન્વિતમ્ ।
સ્વરાલઙ્કારસંયુક્તં પઠેત્પાઠ્યં યથાવિધિ ॥ ૧૪૭॥

અલઙ્કારા વિરામાશ્ચ યે પાઠ્યે સંસ્કૃતે સ્મૃતાઃ ।
ત એવ સર્વે કર્તવ્યા સ્ત્રીણાં પાઠ્યે ત્વસંસ્કૃતે ॥ ૧૪૮॥

એવમેતત્સ્વરકૃતં કલાતાલલયાન્વિતમ્ ।
દશરૂપવિધાને તુ પાઠ્યં યોજ્યં પ્રયોક્તૃભિઃ ॥ ૧૪૯॥

ઉક્તં કાકુવિધાનં તુ યથાવદનુપૂર્વશઃ ।
અત ઊર્ધ્વં પ્રવક્ષ્યામિ દશરૂપવિકલ્પનમ્ ॥ ૧૫૦॥

॥ ઇતિ ભરતીયે નાટ્યશાસ્ત્રે વાગભિનયે કાકુસ્વરવ્યઞ્જનો નામ સપ્તદશોઽધ્યાયઃ ॥

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 17*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*